मह्वारसम् २१ । इति रत्नमाला ॥ तुषोदकम् २२ गुल्मम् २३ चुक्रम् २४ धातुघ्नम् २५ उन्नाहम् २६ रक्षोघ्नम् २७ कुण्डगोलकम् २८ सुवीराम्लम् २९ । इति हेमचन्द्रः ॥ वीरम् ३० अभिशवम् ३१ अम्लसारकम् ३२ । अस्य गुणाः । वातश्लेषपित्तज्वरदाहमूर्च्छाशूलाध्मानविबन्धनाशित्वम् ।

"काञ्जिकं दधि तैलन्तु वलीपलितनाशनम् ।
दाहकं गात्रशैथिल्यं वक्ष्यं सन्तर्पणं परम्" ॥

मर्द्दनान्न च भक्षणात् । इति राजनिर्घण्टः ॥ अपि च । भेदकत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । पित्तकृत्त्वविबन्धशुद्धाग्निवृद्धिकारित्वम् । स्पर्शे शीतलत्वम् । श्रमक्लमनाशित्वञ्च । पुरातनस्य तस्य गुणाः । हृत्पाण्डुकृमिरोगनाशित्वम् । अग्निवृद्धिकारित्वञ्च । इति राजवल्लभः ॥ * ॥

"कुल्माषधान्यमण्डेन चाघृतं काञ्जिकं भवेत् ॥
यन्मस्त्वादिशुचौ भाण्डे स गुड़क्षौद्रकाञ्जिकम् ।
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते" ॥

इति वैद्यकपरिभाषा ॥

काञ्जिकवटकः, पुं, (काञ्जिकयोगेन कृतो वटकः ।) वटकविशेषः । काँजि वड़ा इति भाषा । तस्य पाकप्रकारो यथा,—

"मत्स्यनी नूतना धार्य्या कटुतैलेन लेपिता ।
निर्म्मलेनाम्बुनापूर्य्यं तस्याघूर्णं विनिक्षिपेत् ॥
राजिकाजीरलवणहिङ्गुशुण्ठीनिशाहतम् ।
निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् ॥
ततो दिनत्रयादूर्द्धमस्याः स्युर्वटका ध्रुवम्" ॥

अस्य गुणाः ।

"काञ्जिकवटको रुच्यो वातहरः श्लेष्मकारकः शीतः ।
दाहं शूलमजीर्णं हरते नेत्रामयेष्वहितः" ॥

इति भावप्रकाशः ॥

काञ्जिका, स्त्री, (कुत्सिता ईषद्वा अञ्जिका ।) जीवन्तीलता । पलाशीलता । इति राजनिर्घण्टः ॥

काञ्जी, स्त्री (कं जलं अनक्ति । क + अन्ज + कर्म्मणि + अण् । गौरादित्वात् ङीष् ।) महाद्रोणावृक्षः । इति राजनिर्घण्टः ॥ काञ्जिकम् । इत्यमरटीका ॥ ("तुम्बीबीजं सौद्भिदन्तु काञ्जीपिष्टं गुड़ीत्रयम् । अर्शोहरं गुदस्थं स्याद्धिमाद्रिषमग्नुतः" ॥ इति तु काञ्जिकार्थे ज्ञेयम् । इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे ।)

काठः, पुं, (काठ्यते वध्यते इति । कठ + कर्म्मणि घञ् ।) पाषाणः । इति त्रिकाण्डशेषः ॥

काठिन्यं, क्ली, (कठिनस्य भावः । कठिन + ष्यञ् ।) कठिनता । यथा । "सीते मा कुरु सम्भ्रमञ्च मृदुना काठिन्यमङ्गीकृतम्" । इत्युद्भटः ॥ (यथा च कुमारे । ६ । ७३ ।
"काठिन्यं स्थावरे काये भवता सर्व्वमर्पितम्" ॥)

काठिन्यफलः, पुं, (काठिन्यं फले यस्य ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥ (कपित्थशब्देऽस्य गुणादयो बोद्धव्याः ॥)

काणः, पुं, (कणति एकचक्षुर्निमीलतीति । कण संज्ञायां कर्त्तरि घञ् ।) काकः । इति मेदिनी ॥

काणः, त्रि, (कणति एकचक्षुषा पश्यति । कण् + घञ् ।) एकचक्षुः । इति मेदिनी ॥ काणा इति भाषा । (यथा, मनुः । ३ । २४२ ।
"खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्" ।)

काणूकः, पुं, (कणति शब्दायते । कण शब्दे + "मूकशिभ्यामूकोकणौ" । उणां ४ । ३९ । इत्यूकण् ।) काकः । इत्युणादिकोषः ॥

काण्डं, क्ली, (कणतीति । कण शब्दे + डः । बाहुलकात् दीर्घः ।) सन्धिविच्छिन्नैकखण्डास्थि । यथा ।

"भग्नं समासाद्विविधं हुताश-
काण्डे च सन्धौ च हि तत्र सन्धौ ।
उत्पिष्टविश्लिष्टविवर्त्तितञ्च
तिर्य्यग्गतं क्षिप्तमधश्च षट् च" ॥

इति रोगविनिश्चयः ॥ सन्धिविच्छिन्नमेकखण्डमस्थिकाण्डम् । काण्डेन च नलककपालवलयतरुणकचकानां ग्रहणम् । तत्र भग्नं काण्डभग्नम् । इति तट्टीकाव्याख्यामधुकोषः ॥

काण्डः, पुं क्ली, (कणि दीप्तौ + समन्तात् डः । कादिभ्यः कित् अनुनासिकस्येति दीर्घः ।) दण्डः । (यथा, कात्यायनश्रौतसूत्रे ८ । ७ । २७ ।
"एषता वरत्राकाण्डेनाहन्ति" ।
"वरत्राकाण्डेन वंशदण्डेन" । इति कर्कः ॥) नालम् । वाणः । (यथा, महाभारते १३ । ५ । ३ ।
"विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः ।
सविषं काण्डमादाय मृगयामास वै मृगम्" ॥)
शरवृक्षः । अर्व्वा । कुत्सितः । वर्गः । (वर्गश्च एकजातीयसमवायः । यथा, भागवते । ४ । २४ । ९ ।
"क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह ॥)
परिच्छेदः । (यथा, अथर्व्ववेदे १२ । ३ । ४५ ।
"इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात्परमेष्ठी समाप" ॥) अवसरः । प्रस्तावः । वारि । जलम् । इत्यमरः । ३ । ३ । ४३ ॥ (यथा, हेः रामायणे २ । ८९ । १८ ।
"तान्तु गत्वा परं तीरमवरोप्य च तं जनम् ।
निवृत्ताः काण्डचित्राणि क्रियन्ते दाशबन्धुभिः" ॥
"क्रीड़ार्थं काण्डचित्राणि काण्डे जले चित्राणि चित्रगमनानि लघुत्वात् क्रियन्ते कैवर्त्तैः" ॥
इति तट्टीका ॥) स्तम्बः । (यथा, अमरुशतके ९५ ।
"उरुदयं मृगदृशः कदलस्य काण्डौ
मध्यञ्च वेदिरतुलं स्तनयुग्ममस्याः" ॥)
इक्ष्वादिगुच्छः । (यथा, भट्टिः ५ । १८ ।
"दूर्व्वाकाण्डमिव श्यामा न्यग्रोधपरिमण्डला" ॥)
तरुस्कन्धः । गुँड़ि इति भाषा । (यथा, रामायणे । "हस्तकाण्डमितो भाति" ॥ वृक्षाणां शाखा । यथा, मनुः १ । ४६ ।
"उद्भिज्जाः स्थावराः सर्व्वे बीजकाण्डप्ररोहिणः" ।
"केचित्काण्डात् शाखा एव रोपिता वृक्षतां यान्ति" ॥ इति तट्टीका ॥ वृन्दः । समूहः । रहः । निर्जनस्थानम् । इति मेदिनी ॥ श्लाघा । इति हेमचन्द्रः ॥ पापीयान् । इति धरणिः ॥

काण्डकटुकः, पुं, (काण्डे स्तम्भे लतायामित्यर्थः कटुकः तिक्तः ।) कारवेल्लः । इति राजनिर्घण्टः ॥ (कारवेल्लशब्देऽस्य विवरणं ज्ञेयम् ॥)

काण्डकाण्डकः, पुं, (काण्डस्य शरवृक्षस्य काण्डमिव काण्डं यस्य । काण्डकाण्ड + कप् ।) काशतृणम् । इति राजनिर्घण्टः ॥

काण्डकारं, स्त्री, (काण्डं स्कन्धं किरति दीर्घतया उत्क्षिपति । काण्ड + कॄ + अण् ।) गुवाकः । इति शब्दमाला ॥ (पुंसि तु काण्डं वाणं करोति इति काण्डकारः । वाणकारकः ॥)

काण्डकीलकः, पुं, (काण्डे स्कन्धे कीलकमिव यस्य । काण्डकील + कप् ।) लोध्रः । इति राजनिर्घण्टः । लोधकाठ इति भाषा ॥

काण्डगुण्डः, पुं, (काण्डेन गुच्छेन गुण्डयति वेष्टयति भूमिम् । काण्ड + गुड़ि वेष्टने + अण् ।) गुण्डनामतृणम् । इति राजनिर्घण्टः ॥

काण्डगोचरः, पुं, (काण्डस्य वाणस्य गोचर इव गोचरो यस्य ।) नाराचः । लौहमयवाणः । इति त्रिकाण्डशेषः ॥

काण्डणी, स्त्री, (काण्डेन स्तम्भेन नीयतेऽसौ काण्डं नयति आत्मानं वा । काण्ड + नी + क्विप् । पृषोदरादित्वात् णत्वम् ।) सूक्ष्मपर्णलता । रामदूती इति ख्याता । इति शब्दचन्द्रिका ॥

काण्डतिक्तः, पुं, (काण्डे स्कन्धे तिक्तः ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"किराततिक्तः कैरातः कटुतिक्तः किरातकः ।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणादयोऽस्य किराततिक्तशब्दे ज्ञेयाः ॥)

काण्डतिक्तकः, पुं, (काण्डतिक्त + स्वार्थे कन् ।) भूनिम्बवृक्षः । इति शब्दचन्द्रिका । चिराता इति भाषा ॥

काण्डनीलः, पुं, (काण्डे स्कन्धे नीलः ।) लोध्रः । इति राजनिर्घण्टः ॥

काण्डपटः, पुं, (काण्डे काष्ठादिनिर्म्मितस्तम्भे आवरकत्वात् स्थितः पटः ।) यवनी । तिरस्करिणी । इति हेमचन्द्रः । कानात् इति भाषा ॥

काण्डपुङ्खा, स्त्री, (काण्डस्य वाणस्य पुङ्ख इव पुङ्खो यस्याः ।) शरपुङ्खा । इति राजनिर्घण्टः ॥

काण्डपुष्पं, क्ली, (काण्डात् स्कन्धं व्याप्य पुष्पं यस्याः ।) सुदृश्यगन्धिपुष्पविशेषः । इति शब्दचन्द्रिका । दोना इति भाषा ॥

काण्डपृष्ठं, क्ली, (काण्डं तरुस्कन्ध इव स्थूलं पृष्ठं यस्य ।) कर्णधनुः । इति महाभारतम् ॥

काण्डपृष्ठः, त्रि, (काण्डः वाणः पृष्ठे यस्य ।) काण्डस्पृष्टः । शस्त्राजीवः । इत्यमरटीकायां स्वामी ॥ ("स्त्रीपूर्व्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ ! । अजपा ब्राह्मणाश्चैव श्राद्धे नार्हन्ति केतनम्" ॥ इति महाभारते । १३ । २३ । २२ ॥) वैश्यापतौ पुं । इति दायधर्म्मः ॥

काण्डवारिणी, स्त्री, (काण्डान् संग्रामापतितान् वाणान् स्मरणादेव निवारयतीति । काण्ड + वृ + णिच् + णिनिः ।) दुर्गा । यथा,—
"महागजघटाटोपसंयुगे नरवाजिनाम् ।
स्मरणाद्धरते वाणान् तेन सा काण्डवारिणी" ॥
इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥